॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय १९

अथ जित्वा मरुत्तं स प्रययौ राक्षसाधिपः ।
नगराणि नरेन्द्राणां युद्धकाङ्क्षी दशाननः ॥ १॥

स समासाद्य राजेन्द्रान्महेन्द्रवरुणोपमान् ।
अब्रवीद्राक्षसेन्द्रस्तु युद्धं मे दीयताम् इति ॥ २॥

निर्जिताः स्मेति वा ब्रूत एषो हि मम निश्चयः ।
अन्यथा कुर्वतामेवं मोक्षो वो नोपपद्यते ॥ ३॥

ततस्तु बहवः प्राज्ञाः पार्थिवा धर्मणिश्चयाः ।
निर्जिताः स्मेत्यभाषन्त ज्ञात्वा वरबलं रिपोः ॥ ४॥

दुष्यन्तः सुरथो गाधिर्गयो राजा पुरूरवाः ।
एते सर्वेऽब्रुवंस्तात निर्जिताः स्मेति पार्थिवाः ॥ ५॥

अथायोध्यां समासाद्य रावणो राक्षसाधिपः ।
सुगुप्तामनरण्येन शक्रेणेवामरावतीम् ॥ ६॥

प्राह राजानमासाद्य युद्धं मे सम्प्रदीयताम् ।
निर्जितोऽस्मीति वा ब्रूहि ममैतदिह शासनम् ॥ ७॥

अनरण्यः सुसङ्क्रुद्धो राक्षसेन्द्रमथाब्रवीत् ।
दीयते द्वन्द्वयुद्धं ते राक्षसाधिपते मया ॥ ८॥

अथ पूर्वं श्रुतार्थेन सञ्जितं सुमहद्धि यत् ।
निष्क्रामत्तन्नरेन्द्रस्य बलं रक्षोवधोद्यतम् ॥ ९॥

नागानां बहुसाहस्रं वाजिनामयुतं तथा ।
महीं सञ्चाद्य निष्क्रान्तं सपदातिरथं क्षणात् ॥ १०॥

तद्रावणबलं प्राप्य बलं तस्य महीपतेः ।
प्राणश्यत तदा राजन्हव्यं हुतमिवानले ॥ ११॥

सोऽपश्यत नरेन्द्रस्तु नश्यमानं महद्बलम् ।
महार्णवं समासाद्य यथा पञ्चापगा जलम् ॥ १२॥

ततः शक्रधनुःप्रख्यं धनुर्विस्फारयन्स्वयम् ।
आसदाद नरेन्द्रास्तं रावणं क्रोधमूर्छितः ॥ १३॥

ततो बाणशतान्यष्टौ पातयामास मूर्धनि ।
तस्य राक्षसराजस्य इक्ष्वाकुकुलनन्दनः ॥ १४॥

तस्य बाणाः पतन्तस्ते चक्रिरे न क्षतं क्व चित् ।
वारिधारा इवाभ्रेभ्यः पतन्त्यो नगमूर्धनि ॥ १५॥

ततो राक्षसराजेन क्रुद्धेन नृपतिस्तदा ।
तलेन भिहतो मूर्ध्नि स रथान्निपपात ह ॥ १६॥

स राजा पतितो भूमौ विह्वलाङ्गः प्रवेपितः ।
वज्रदग्ध इवारण्ये सालो निपतितो महान् ॥ १७॥

तं प्रहस्याब्रवीद्रक्ष इक्ष्वाकुं पृथिवीपतिम् ।
किमिदानीं त्वया प्राप्तं फलं मां प्रति युध्यता ॥ १८॥

त्रैलोक्ये नास्ति यो द्वन्द्वं मम दद्यान्नराधिप ।
शङ्के प्रमत्तो भोगेषु न शृणोषि बलं मम ॥ १९॥

तस्यैवं ब्रुवतो राजा मन्दासुर्वाक्यमब्रवीत् ।
किं शक्यमिह कर्तुं वै यत्कालो दुरतिक्रमः ॥ २०॥

न ह्यहं निर्जितो रक्षस्त्वया चात्मप्रशंसिना ।
कालेनेह विपन्नोऽहं हेतुभूतस्तु मे भवान् ॥ २१॥

किं त्विदानीं मया शक्यं कर्तुं प्राणपरिक्षये ।
इक्ष्वाकुपरिभावित्वाद्वचो वक्ष्यामि राक्षस ॥ २२॥

यदि दत्तं यदि हुतं यदि मे सुकृतं तपः ।
यदि गुप्ताः प्रजाः सम्यक्तथा सत्यं वचोऽस्तु मे ॥ २३॥

उत्पत्स्यते कुले ह्यस्मिन्निक्ष्वाकूणां महात्मनाम् ।
राजा परमतेजस्वी यस्ते प्राणान्हरिष्यति ॥ २४॥

ततो जलधरोदग्रस्ताडितो देवदुन्दुभिः ।
तस्मिन्नुदाहृते शापे पुष्पवृष्टिश्च खाच्च्युता ॥ २५॥

ततः स राजा राजेन्द्र गतः स्थानं त्रिविष्टपम् ।

स्वर्गते च नृपे राम राक्षसः स न्यवर्तत ॥ २६ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com